श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीनवनीतकृष्णाष्टकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीनवनीतकृष्णाष्टकं ॥

मन्दस्मितं मधुरकोमललास्यलीलं
    कन्दर्पकोटिकमनीयकिशोरमूर्तिम्।
कुन्दस्फुरद्दशनकं कुटिलालकान्तं
    वन्देय नन्दतनयं नवनीतकृष्णम्॥ १॥

नाट्यावलोकनकुतूहलिभिः प्रदिष्टं
    कोट्या करस्य नवनीतघनं दधानम्।
शाट्या शिशोरुचितया शबलावलग्नं
    वीट्या लसन्मुखमिमो नवनीतकृष्णम्॥ २॥

मञ्जीरमञ्जुचरणं मृदुलाङ्गुलीकं
    पुञ्जीभवन्मधुपपुष्कलपुष्पमालम्।
कञ्जीभवन्नयनमाश्रितदेहभाजां
    सञ्जीवनं नम मनो नवनीतकृष्णम्॥ ३॥

पूरेण नीलमहसां परिपूर्णगात्रं
    हारेण मौक्तिकजुषा हृतसर्वचित्तम्।
चोरेण मोहितमुनिं दधिकुण्डभाजा
    पारेगिरं स्तुहि मनो नवनीतकृष्णम्॥ ४॥

पद्मालयाधरणिपालितपार्श्वयुग्मं
    सद्मास्थितं मणिकनत्कनकावक्लृप्तम्।
छद्मादिदूरगजनैः परिचर्यमाणं
    विद्मः कथं वयममुं नवनीतकृष्णम्॥ ५॥

ध्यातं सदा मुनिजनैरभिवृद्धहर्षैः
    पूतं मुहुर्व्रजवधूजनचुम्बितैस्तैः।

www.prapatti.com

क्रीतं क्षणेन शरणागतदीनवाचा
 स्फीतं श्रिया भज मनो नवनीतकृष्णम्॥ ६ ॥

उद्यन्मृगाङ्ककमनीयमुखारविन्दं
 सद्यःस्फुरत्कमलकोमललोचनान्तम्।
यद्यन्नताभिलषितं तदुपार्जयन्त-
 मद्य स्मरामि सरसं नवनीतकृष्णम्॥ ७ ॥

तुङ्गं गुणैरनुपमैरनवद्यगन्धैः
 सङ्गं श्रितेषु सततं स्वयमादधानम्।
अङ्गं वहन्तमतुलं नवमेघनीलं
 त्वं गन्तुमर्हसि मनो नवनीतकृष्णम्॥ ८ ॥

नवनीतकृष्णविषयामवनीसुरभावुकां स्तुतिं कथयन्।
सवनी संपन्नः स्यात् स वनी स यतिः स एव मुक्तश्च॥ ९ ॥

॥ इति श्रीनवनीतकृष्णाष्टकं समाप्तम्॥

www.prapatti.com